॥१॥

॥श्रीगणेशाय नमः॥श्रीगुरुभ्यो नमः॥अथ विष्णुमूर्त्तिप्रतिष्ठा
लिख्यते॥अथ पराशरोक्तसंहितायां पंचरात्रप्रकारेण पा
मतंत्रक्रमेण च बौधायनमतेन च देवालयस्थापनयोग्य
शिलादारुमृत्ताम्रमयादि नानाविध स्थावर विष्णुमूर्त्तीनां
च प्राणप्रतिष्ठाक्रमं वक्ष्यामः॥स्वगृहे नित्यपीठपूजायो
ग्य स्वर्णरचित ताम्रादि धातुमय नानाविष्णूनां च प्राणप्रति
ष्ठाक्रमं वक्ष्यामः॥शुभे ह नि यजमानः मंगलस्नातः वि
प्रानाहूय यथोक्तविहित वेदिसहितनव मंडपे पुण्या
हं वाचयित्वा॥ ॥मम मद्देह जन्म निजन्मांतरेषु महापा

इदं पुस्तकं विष्णुप्रतिष्ठापद्धतिग्रं १ भक्तारोपनाम
कसखारामस्य ॥८॥

विष्णु॰
॥२॥

कर्मणि आचार्यत्वेन विष्णुभक्तं त्वामहं वृणे ॥ वृतोस्मि ॥ अत्र
तेन दीक्षा॰ ऋक्॰ ॥ अस्मिन्विष्णुमूर्त्तिप्रतिष्ठाख्ये कर्मणि ब्र
ह्माणं त्वामहं वृणे ॥ पूर्ववत् ॥ अस्मिन्विष्णुमूर्त्तिप्रतिष्ठाख्ये
कर्मणि ऋत्विगर्थं त्वामहं वृणे ॥ कुलराजपेद्वारजपे वेद
ध्ययनपुराणेतिहासगीतासहस्रनामपठनऋत्वि
गर्थं त्वामहं मैं हैं वृणे ॥ वृतोस्मि ॥ ततः आभ्युदैकं कृत्वा ॥
वैष्णवमंत्रपठनादि दिनं नीत्वा ॥ तत्सायंकाले स्वसूत्रोक्त
विधिना अंकुरार्पणं कुर्यात् ॥ ब्राह्मणान्भोजयित्वा ॥ निय
मेन रात्रीं नीत्वा ॥ ॥ परेद्युः प्रातःकाले नित्यकर्म विधाय ॥

प्रतिष्ठा ॥

॥२॥

तक्रादिप्रकीर्णकृतसकलदुरितनिवृत्तिद्वाराचतुर्वि
धपुरुषार्थसिध्यर्थं ममऐहिकामुष्मिकफलसिध्यर्थं
कल्पोक्तफलावाप्त्यर्थं महाविष्णुप्रसादसिध्यर्थं एकविं
शतिसंख्याकोभयवंशोत्तारणार्थं अस्यां विष्णुप्रतिमा
यां कल्पोक्तविधिना प्राणप्रतिष्ठापनं करिष्यमाणतदा
दौ तदंगत्वेन ~~स्वस्तिवाचनादि~~ आचार्यब्रह्मऋत्विग्वर्णं
शुध्यर्थं वृध्यर्थं शांत्यर्थं आभ्युदयार्थं च आयुष्कामा
र्थफलसिध्यर्थं महाजनैः सह पुण्याहवाचनं करिष्ये॥
शुभं शुभं॥ एवं कृते अस्यां विष्णुमूर्तौ प्राणप्रतिष्ठाख्ये

शिलाहस्तात्समादाय सम्यग्बिंबं परिक्षयेत्॥ समदृष्टि
मर्चां गृहीत्वा। वस्त्रादिना शिल्पिनं परितोष्य॥ बिंबं सहहि
रण्यदूर्वायवअश्वत्थपलाशपर्णेन पंचगव्येन ▮ प्रक्षा
ल्य। प्रणवेनाभिमंत्र्य च। फलपुष्पसहितेन अक्षताय
व दूर्वांकुरसहितेन जलेन आपोहिष्ठा मयोभुवइति तिसृ
भिः। हिरण्यवर्णामिति च तसृभिः। पवमानः सुवर्जन
इत्यनुवाकेन। व्याहृतिभिः स्नापयित्वा॥ नमस्ते चैसुरेशा
नि प्रतिमा विश्वकर्मणी॥ प्रभाविताशेषजगद्धात्री तुभ्यं
नमो नमः॥१॥ संपूजयामि देवेशं नारायणमनामयं॥र

विष्णुप्र॰
॥३॥

हितादृव्यदोषस्त्वमट्ठियुक्त्वापराभव॥२॥ इति संप्रार्थ्य॥ ता
मर्च्य॥ पीठे सुवर्णोपधानां प्राङ्मुखउपवेश्य॥ पुनः संक
ल्प्य॥ पुण्याहं वाचयित्वा॥ देवस्य दक्षिणहस्ते देव्याश्च वा
महस्ते इदं विष्णुर्विचक्रम इति यजमानस्य दक्षिण
हस्ते बहस्सामेति मंत्रेण प्रतिसरान्बध्वा॥ यघप्रतंतु
देवस्य तत्तदेव्याः समाचरेत्॥ संहारं च निसर्गं च संसम
रेत्क्रमयोगतः॥३॥ बिंबस्य गात्रे तत्त्वादि न्यथि व्याहीन्य
तुक्रमात्॥ इत्युक्तो॥ अस्य बिंबस्य प्राणप्रतिष्ठासिध्य
र्थं संहारनिसर्गौ भावयामि इति संकल्प्य॥ बिंबस्य ह

तिष्ठा॰
॥३॥

दयात्तत्त्वदीपकरिकाकारां जीवकलां सोहमिति मंत्रेणां कु
शमुद्रया ब्रह्मांडस्थितसहस्रदलपद्मांतर्गतो देवेन
संयोजित इति भावयित्वा॥ बिंबस्य पादादिजानुपर्यंतं पृ
थिवीस्थानं॥ तत्र पार्थिवमंडलं॥ अष्टसु दिक्षु वज्रलांछि
तं पीतवर्णं॥ तन्मध्ये लं बीजं॥ एवंविधां पृथिवीं उदके वि
लापयामि॥१॥ जान्वादिनाभिपर्यंतं आपस्थानं॥ तत्र
वारुणमंडलं॥ चतुरस्रर मुभयोः कट्यां श्वेतपद्मलां
छितं शुभ्रवर्णं तन्मध्ये वं बीजं एवंविधा आपस्तेजसि
विलापयामि॥२॥ नाभ्यादि हृदयपर्यंतं तेजस्थानं तत्र

वेदुप्र०
॥७॥

त्रिकोणं वह्निमंडलं कोणेषु स्वस्तिकलांछितं रक्तवर्णं तन्मध्ये
रं बीजं एवंविधं तेजो वायौ विलापयामि ॥३॥ हृदयादि भ्रूमध्य
पर्यंतं वायुस्थानं । तत्र षट्कोणं वायुमंडलं षड्बिंदुलांछितं धू
म्रवर्णं तन्मध्ये यं बीजं एवंविधं वायुं आकाशे प्रविलापयामि ॥४॥
भ्रूमध्यादि ब्रह्मरंध्रपर्यंतं आकाशस्थानं । तत्र वृत्तमाकाश
मंडलं ध्वजांकितं छलांछितं दरछवर्णं तन्मध्ये हं बीजं ए
वंविधं आकाशं मंडलमहंकारे विलापयामि ॥५॥ तमहं
कारं पंचतन्मात्रं महत्तत्त्वे विलापयामि ॥६॥ तन्महत्तत्त्वं मा
यायां विलापयामि ॥७॥ तां मायां सच्चिदानंदघने परब्र

ति.७०
॥७॥

ह्मणि विलापयामि ॥८॥ एवं ब्रह्मणि संहारं भावयित्वा ॥ पुनः
सिसृक्षया सृष्टिं भावयेत् ॥ कारणभूतात्मनः प्रकृतिः । प्र
कृतेर्महान् । महतोहंकारः ॥ अहंकारात्पंचतन्मात्राण्याकाशः
आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथि
व्या ओषधयः । ओषधीभ्योन्नं । अन्नाद्रेतः । रेतसः पुरुषः ।
स वा एष पुरुषोन्नरसमयात् । तस्य पूर्वमेव शिरः । अयं द
क्षिणः पक्षः । अयमेवोत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्र
तिष्ठा । तदप्येष श्लोको भवति । अस्थिमज्जा मेदमांस रक्त
त्वचा इति षड्धातुवंतो भवति । एवमुत्पन्नेभ्यः पंचमहा
भूतेभ्यः इदं परमपुरुषादाहननयोग्यः ॥ भक्तपूजाग्रहण

विष्णु०
॥५॥

साधनं दिव्यशरीरं समुत्पन्नमिति ग्लौं इसनेन घनीभूतं भा
वयित्वा॥ पूर्वं ब्रह्मणि संयोजितां जीवकलां सोहमिसनेनैव
यथास्थितां कुर्यात्॥ एवं संहारनिसर्गौ भावयित्वा। पीठे प्र
कृतिरसं देवं स्थापयेत्॥ अथ कलशस्थापनं॥ घृतं मिमि
क्षे इति प्रतिमां घृतेनाभ्यज्य॥ तंडुलराशौ धौतवस्त्रमाच्छाद्य स्था
पयित्वा। ततः चतुरो कलशान् चतुर्दिक्षु धान्योपरि स्थापयि
त्वा। प्रधानकलशं देवस्य पुरतः तंडुलोपरि आकलशेष्वि
ति संस्थाप्य॥ तेषु कलशेषु सर्वे समुद्रा इति शुद्धोदकमापू
र्य। कलशस्य मुखे विष्णुरित्यादि वेदोक्तपुराणोक्तमंत्रैरा
वाह्य। गंधपुष्पाक्षतैरभ्यर्च्य। प्रणवेनापि धाया। स्यानाप

प्रतिष्ठा०
॥५॥

थिव्रीति मृत्तिकां। स्रवंति भीम इति पंचत्वचः। प्रवो यह्वेष्विति पं
च पल्लवान्। सहिरत्नानीति पंचरत्नानि। गायत्र्या गोमूत्रं। गं
धद्वारामिति गोमयं। आप्यायस्वेति क्षीरं। दधिक्राव्ण इति द
धि। शुक्रमसीत्याज्यं। मधुवाता इति मधु। अपां रसमिति
शर्करा। देवस्य त्वेति कुशोदकं। ओषधयः संवदंत इति शतौ
षधानि प्रक्षिप्य। इमं मे वरुणेति वरुणमावाह्य। कुश दूर्वाक्ष
ततिल चंदन श्वेत सर्षपान् हिरण्यादि श्योदुंबर शमी बिल्व
पलाशाश्वत्थ पल्लवान्। पद्मपत्रं च क्षोत्रोयं तुलसीमंजरी क्षिपे
त्॥ सुवर्ण रजत ताम्र एलालवंग कंकोल कर्पूर पत्रकं श्रीफला
नि क्रमुक जातीफलं पुष्पं शुभपल्लवफलानि च। गुग्गुलं च निक्षि

विष्णुप्र०
॥६॥

प्य॥ शमीपलाशखदिरबिल्वाश्वत्थवैकंकतन्यग्रोधपनसाम्र
शिरीषोदुंबराणां सर्वयज्ञियवृक्षाणां चर्माणि च। विष्णुकांत
श्यामाकांश्च प्रक्षिप्य। सुदर्शनमुद्रां प्रदर्श्य॥ नवतंतुभिरावे
ष्ट्य। वस्त्रखंडैराच्छाद्य॥ मूलमंत्रेणाभिमंत्र्य। कलशराजं पंकार
यित्वा। तत्कलशोदकैश्चतुर्भिर्विष्णुभक्तैर्ब्राह्मणैः पुरुषसूक्तेन
अन्यैर्विष्णुसूक्तैरष्टाक्षरैर्द्वादशाक्षरैः देवताकर्मांगदेवता
लोकपालानावाह्य॥ गरुडविष्वक्सेनानंतशेषसनकसनंदना
दीन्नारदादीन्वैष्णवान्॥ पार्श्वतः शंखचक्रादीन् आवाह्य॥ षो
डशोपचारैः संपूज्य। कलशस्य पूर्णद्वारावासर्वेदिक्षु वि
न्यस्य। तेषु इंद्रादिलोकपालानावाह्य संपूज्य॥ यजमानादयः

तिष्ठा०
॥६॥

सर्वे ब्राह्मणाः विष्णुहृष्टाः संतः विष्णुं ध्यायंतः वैष्णवसूक्तान्यठंतः मं
त्रहृदयं द्वादशार्णं वं षडक्षरं च जपंतः श्रुतीतिहासपुराणगीतास
हस्रनामादिपुण्यस्तोत्राणि पठंतः नृत्यगीतवाद्यैर्दीपिकाभिश्च
रात्रीं नयेयुः॥ ॥ततः परेद्युः प्रातरुत्थाय स्नानदानादिकं स
माप्य। तूर्यघोषैः तीर्थदेशं समासाद्य। प्रतिमां जलान्मूलमंत्रे
ण स्थाप्य। उत्तिष्ठ ब्रह्मणस्पत इति सूक्तं जपित्वा। भद्रं कर्णेभिरि
ति मंत्रेण जलाद्बहिः पूर्ववत्स्थापयित्वा। करकंकणमुत्सृज्य।
प्रक्षालितां सुवर्णशलाकां घृतेनाक्त्वा। शलाकां कुशैः सह हस्त
मादाय। चित्रं देवानामिति मंत्रेण देवस्य दक्षिणनेत्रमुन्मील
य। पुनः शलाकां प्रक्षाल्य। घृतेनाक्त्वा। कुशैः सह। तच्चक्षुरि

विष्णु॰ प्रतिष्ठा॰

॥७॥

तिमंत्रेण वाम नेत्रमुन्मील्य। वयः सुपर्णेतिउद्दूयं तमसस्परी
ति देवमुत्थाप्य। प्राङ्मुखं पीठे उपविश्य। मंत्ररत्नेन पुरुषसू
क्तेन मार्जनं कृत्वा॥ मंगलानि प्रयुंजीत तत्त दृष्टिं विधिं सच॥
प्रशस्तादि पृथिव्यां तं मंगलानि दर्शयित्वा। पाठिकां दर्पण
धान्यं कन्यां गां सुप्रतीपां सुमंगलिं छत्रं चामरं च दर्शयित्वा।
शंखचक्रनवधान्य सुवर्ण रजत दूर्वामधु हरिद्रा सर्पिषि
अक्षतान्सर्षपान्पताकां श्च वैनतेयं युग्म कुंभं च क्रं शंख
गदां पद्मं अनिलं खड्गमेव च॥ धनुश्च नवमाल्यानि अष्टमु
द्राः प्रदर्शयेत्॥१॥ ततः पंचगव्यादिभिः पूर्वकलशास्थितै

॥७॥

वर्षापावमानैरभिषिंच्य। तैलेनाभ्यज्य। माषमुद्ग हरिद्राभ्रचूर्णे
न उद्वर्त्य। शुद्धोदकेन जलेन स्नापयित्वा। विष्णुसूक्तेश्चतन्मूले
मंत्रेणाष्टाविंशति वारमभिषिंच्य। विचित्र वस्त्रैर्देवं वेष्टयित्वा॥

त

रत्नखचितैः स्वर्णभूषणैरलंकृत्य। गंधपुष्पाक्षतादिभिरभ्य
र्च्य। धूपदीप नैवेद्यादि दत्वा। नीराजनं कृत्वा। समंताद्धूलिं द
त्वा। रथ्यर थेनिवेश्यान्तस्य गीत वाद्यादि छत्र चामर पताका
ध्वजादिभिः शाकुनादि शुभ मंत्र स्तोत्र पाठै देवं प्रतिष्ठामं
डपं प्रवेश्य। यागवेद्यां यथाशास्त्र कल्पितायां उपरिवितान
नादि शोभितायां चतुर्दिक्षु तोरणयुतायां स्वस्य संयुत शाय
नाष्टकसहितायां सर्वतोदीपिकायां स्वस्तिक शंखपद्मादिस

विष्णु॰ ॥८॥

र्वतोभद्रलिंगतोभद्रादिरंगावलियुतायांसस्यसंयुतशरावाष्ट
कसहितायांसर्वतोदीपिकायांवेदध्वनियुक्तायांयथाशक्तिधव
लतंडुलचतुरस्रमंडलेविरचितकमलकर्णिकायांव्याघ्रचर्म
णापरिछाद्य।तस्मिन्कौशेयवस्त्रमाछाद्य।तस्मिन्कोमलकु
शांकुरानास्तीर्य।सुरभीणिनानाविधकुसुमानिविकीर्य।तत्र
देवंनिवेश्य।प्रयत्नेनगंधपुष्पाक्षतैरलंकृत्य।दिग्विदिक्षु
पुनःअष्टकलशान्प्राग्यस्योपरिसंस्थाप्य।पूर्ववत्कलशार
धनंकृत्वा।तेषुकलशेषुपूर्वोक्तसर्वद्रव्याणिनिक्षिप्य।तेषु
कलशेषुलोकपालानावाह्य।दिक्कलशेषुसर्वेषुसुरान्॥

प्रतिष्ठा॰ ॥८॥

विदिक्कलशेषुसर्वेशानंदादीन्।आवाह्य।पूज्यचादेवस्यपुर
तःतंडुलोपरिपविशोदकपूरितंप्रधानकलशंनिधाय।तत्र
सर्वंपूर्ववत्कृत्वा।सर्वेषुकलशेषपिपूर्वोक्तसर्वद्रव्याणिनिक्षि
प्य।तेषुलोकपालानावाह्य।तस्मिन्कलशेक्षीरशायिनंहरिं
ध्यात्वा।संपूज्य॥अथवाऽत्रनेत्रोन्मीलनं।ततःवेदिपुरतोपी
ठेदेवंसमुपवेश्य।पूर्वमाराधितकलशोदकैर्विष्णुसूक्तैर्बिं
बस्यशिल्पिसंस्पृष्टेय।छेदनभेदनाग्नितपनादिदोषनिवृ
त्त्यर्थंशुध्यर्थंसमभिषिंच्य।पीतांबरैरावेष्ट्य।माणिक्यखचित
भरणैरलंकृत्य।गंधपुष्पाक्षतैरभ्यर्च्य।पुनःपूर्ववत्कुंकु
मंबध्वा।वेद्यामेवोपविश्य।गरुडविष्वक्सेनादिद्वारपालकौ

ध्वशंखचक्रदूतर आदित्यादिनवग्रहान् दुर्गीगणपति
क्षेत्रपालकान् अन्यान्परिवारदेवतान् कर्मांगदेवतानां वास
संपूजयेत्॥ चतुर्दिक्षु चतुर्वेदपारायणं विष्णुसूक्तानां मंत्र
हूयेन चतुर्वेदपारायणं च सर्वपुराणपारायणं च भारत
पारायणं च गीतासहस्रनामपठनं च शांतिसूक्तपठनं
विष्णुस्तोत्रपठनं च एतत्सर्वं योग्यैर्विष्णुभक्तैर्ब्राह्मणैः स
मामिपर्यंतं अहोरात्रं कारयेत्॥ चतुर्दिक्षु हस्तमात्रखा
तानि कुंडानि हस्ता॥ चतुरस्रं अंगुलोत्सेधायुतमेखलास
हितानि कुंडानि हस्ता॥ अश्वत्थपत्रवल्लाकारां द्व्यंगुलोत्से
धसहितां अष्टांगुलविस्तृतां द्वादशांगुलप्रमाणदैर्घ्ययु

तां योनिं कल्पयेत्॥ अशक्तौ विषये एकमेव कुंडं स्थंडिलं
वा देवस्येशानभागे हस्ता॥ होमं कुर्यात्॥ स्थंडिलोल्लेख
नाद्याज्यभागांतं हस्ता॥ समिदाज्यचरुतिलव्रीहिभिः अ
ष्टाक्षर द्वादशाक्षरमंत्राभ्यां पुरुषसूक्तप्रत्यृचं विष्णुसू
क्तइतरैश्च॥ अतो देवा अवंतु नः॰॥ इदं विष्णुर्विचक्रमे॰॥ वि
ष्णोः कर्माणि पश्यत॰॥ तद्विप्रासो विपन्यवः॰॥ त्रीणि पदा वि
चक्रमे॰॥ दिवा मे इति मंत्रेण च पुरुषसूक्तेन च उत्तरनाराय
णेन च श्रीसूक्तेन च भूसूक्तेन च प्रतिश्लोकं प्रतिकुंडं प्रति
द्रव्यं प्रतिमंत्रं अष्टासहस्रं अष्टाशतं अष्टाविंशतिं वा
जुहुयुः॥ चतुर्दिक्षु चतुर्वेदैः प्रत्यनुवाकं जुहुयात्॥ अ

विष्णु॰
॥१०॥
दि

शास्त्रैश्च एकैकमनुवाकं जुहुयात्॥ श्रीमद्भागवतेन श्रीम
द्रामायणेन श्रीमद्भगवद्गीताभिश्च श्रीविष्णुपुराणे
न च प्रतिश्लोकं जुहुयात्॥ सहस्रनामभिरष्टोत्तरनाम
भिः केशवाद्यैः संकर्षणोभिश्च जुहुयात्॥ एवं होमं कृत्वा॥
तद्दिने रात्रौ जागरणं कुर्यात्॥ वेदामेवशाख्याध्यायी देवं स्नाप
यित्वा॥ स्वयं कर्त्ता आचार्यऋत्विग्भिः सहोपवसेत्॥ जपहो
मपारायणनृत्यगीतापारायणगीतवाद्यसहितं प्रतिया
मं पूजयेत्॥ परिमलतांबूलादि समर्पयेत्॥ वारं वारं स्तुत्वा
नमस्कुर्यात्॥ ॥अन्येद्युः प्रातः स्नानसंध्यादिकं कृत्वा। य
थाविधि देवं देविसहितमुत्थाप्य। पीठे निवेश्य। तैलेनाभ्य

प्रतिष्ठा॰
॥१०॥

ज्य। हरिद्राचूर्णेनोद्वर्त्य। शुद्धोदकैः आचार्यऋत्विग्भिः स्ना
पयेत्॥ ततः सुवर्णरजतोदकेन अष्टोत्तरसहस्रं शतं वा मं
त्ररत्नेन स्नापयेत्॥ ततो देवस्य धौतवस्त्रं परिधाय। मणि
भूषणानि धारयेत्॥ गंधादिभिरभ्यर्च्य। नैवेद्यं दत्त्वा॥ नीरा
जनं कुर्यात्॥ ततः पूर्ववद्वैष्णवमंत्रैः पुरुषसूक्तेन च आज्या
हुतीर्हुत्वा। इदं विष्णुर्विचक्रम इति देवस्य पादौ उपस्पृश्य। जु
हुयात्॥ पुनः पुरुषसूक्तेन षोडशाज्याहुतीर्हुत्वा। विष्णोर्नु
कमिति नाभिं स्पृश्य जुहुयात्॥ तेनैवाज्याहुतीर्हुत्वा। अतो देवा
इति मूर्द्धानमुपस्पृश्य जुहुयात्॥ पुनस्तेनैवाज्याहुतीर्जुहुया
त्॥ पुरुषसूक्तेन सर्वांगानि स्पृष्ट्वा तु॥ ततः सुमुहूर्त्ते॥ उद्वसं

जातवेदसमित्युत्थाप्य। शकुनादिसूक्तेन देवं स्वस्थानं प्रवि
श्य॥ स्थावरमूर्त्तिश्चेत् स्थिरपीठे पुनर्न चलति तथा देवा
लये गर्भगृहे स्थिरपीठे स्थापयेत्॥ ताम्रादिधातुमूर्त्तिश्चे
त् यत्र कुत्रापि रम्यस्थले पीठे निवेश्य॥ एवं देवस्य मणिवैडू
र्यमुक्ताप्रवालसुवर्णरजतादिपादपीठे निधाय॥ अतो दे
वा अवंतु न इति सम्यगुपवेशयेत्। गंधपुष्पाक्षतधूपदी
पनैवेद्यादि दत्वा। समदृष्टिः कुर्यात्॥ अधोमुखमूर्ध्वमु
खं न कुर्यात्॥ आवाहयेत्॥ आवाहनक्रमः॥ प्रणवमुच्चार्य
व्यस्ताभिः समस्ताभिश्च व्याहृतिभिः॥ ॐ भूः पुरुषसूक्त
मावाहयामि॥ ॐ भुवः पुरुषसूक्तमावाहयामि॥ ॐ स्वः पुरु

षसूक्तमावाहयामि॥ ॐ भूर्भुवः स्वः पुरुषसूक्तमावाहयामि॥
यजमानः अंतरात्मने विष्णुं ध्यायेत्॥ आदित्याभिमुखो भू
त्वा। अंजलिस्थशुद्धोदकं पात्रे देवं दिव्यतेजोमयं सवितृमं
त्रेण मूलमंत्रेण वा तत्तोयं प्रतिमामूर्ध्नि पुष्पैः सहसेचये
त्॥ अथ यजमानः स्वदेहशुध्यर्थं आगमोक्तप्रकारेण भू
शुद्धिभूतशुद्धिसंहारनिसर्गपापपुरुषदहनप्लावनस्व
शरीरप्राणप्रतिष्ठां कुर्यात्॥ अथ परो व्योम्नि स्थितं देवं
निजध्यानप्रकारेण ध्यात्वा। प्रतिमामतिभक्त्या निरीक्ष्य।
मंत्ररत्नं विष्णुमंत्रान् सूक्तान् जपेत्॥ अथ प्राणप्रतिष्ठां कु
र्यात्॥ ॐ अस्य श्री प्राणप्रतिष्ठामंत्रस्य। ब्रह्माविष्णुमहेश्व

विष्णु०
॥१२॥

शा ऋषयः॥ ऋग्यजुःसामानि छंदांसि॥ सर्वशक्तिश्चैतन्यस्व
रूपप्राणशक्तिर्देवता॥ हां बीजं॥ ह्रीं शक्तिः॥ क्रौं कीलकं॥ अस्यां अ
मुकप्रतिमायां प्राणप्रतिष्ठापने विनियोगः॥ ॐ आं ह्रीं श्रीं क्रौं
क्लीं अं कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने क्रौं क्लीं श्रीं ह्रीं
आं अंगुष्ठाभ्यां नमः॥ ॐ आं ह्रीं श्रीं क्रौं क्लीं इं चं छं जं झं ञं शब्द
स्पर्शरूपरसगंधात्मने क्रौं क्लीं श्रीं ह्रीं ईं तर्जनीभ्यां॥ ॐ आं
ह्रीं श्रीं क्रौं क्लीं उं टं ठं डं ढं णं त्वक्चक्षुःश्रोत्रजिह्वाघ्राणात्मने
क्रौं क्लीं श्रीं ह्रीं ऊं मध्यमाभ्यां॥ ॐ आं ह्रीं श्रीं क्रौं क्लीं एं तं थं
दं धं नं वाक्पाणिपादपायूपस्थात्मने क्रौं क्लीं श्रीं ह्रीं ऐं अनामि ॥१२॥

प्रतिष्ठा०

पं फं बं भं मं

काभ्यां॥ ॐ आं ह्रीं श्रीं क्रौं क्लीं ओं वचनागमविसर्गानंदात्म
ने क्रौं क्लीं श्रीं ह्रीं औं कनिष्ठिकाभ्यां॥ ॐ आं ह्रीं श्रीं क्रौं क्लीं अं
यं रं लं वं शं षं सं हं (ळं क्षं) मनोबुद्ध्यहंकारचित्तात्मने क्रौं क्लीं श्रीं
ह्रीं अः करतलकरपृष्ठाभ्यां नमः॥ एवं हृदयादि॥ ॐ आं ह्रीं
श्रीं क्रौं क्लीं अं कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने क्रौं
क्लीं श्रीं ह्रीं आं हृदयाय नमः॥ ॐ आं ह्रीं श्रीं क्रौं क्लीं इं चं छं जं
झं ञं शब्दस्पर्शरूपरसगंधात्मने क्रौं क्लीं श्रीं ह्रीं ईं शिर
से स्वाहा॥ ॐ आं ह्रीं श्रीं क्रौं क्लीं उं टं ठं डं ढं णं त्वक्चक्षुःश्रो
त्रजिह्वाघ्राणात्मने क्रौं क्लीं श्रीं ह्रीं ऊं शिखायै वषट्॥ ॐ आं

विष्णु० ॥१३॥

ह्रीं श्रीं क्रों क्लीं एं तं थं दं धं नं वाग्राणिपादपायूपस्थात्मने क्रों
क्लीं श्रीं ह्रीं ऐं कवचाय हुं ॥ ॐ आं ह्रीं श्रीं क्रों क्लीं ॐ पं फं बं भं
मं वचनागमविसर्गानंदात्मने क्रों क्लीं श्रीं ह्रीं औं नेत्रत्रया
य वौषट् ॥ ॐ आं ह्रीं श्रीं क्रों क्लीं अं यं रं लं वं शं षं सं हं क्षं
मनोबुद्धिअहंकारचित्तचैतन्यात्मने ७ क्रों क्लीं श्रीं ह्रीं अः
अस्त्राय फट् ॥ भूर्भुवः स्वरोमिति दिग्बंधः ॥ इति षडंगन्या
सः ॥ प्राणशक्तिर्देवता स्वरूपं ध्यायेत् ॥ रक्तांभोधिस्थपो
तोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षु
द्भवमथ गुणमप्यंकुशं पंचबाणान् ॥ बिभ्राणासृक्कं

पं

प्रतिष्ठा० ॥१३॥

पालं त्रिनयनलसिता पीनवक्षोरुजंघा देवी बालार्कवर्णा
भवतु सुखकरी प्राणशक्तिः परा नः ॥१॥ रक्ताअपादारुण
पद्मसंस्थां पाशांकुशामिक्षुशरासबाणान् ॥ शूलं कपा
लं दधतीं कराभ्यां रक्तां त्रिनेत्रां प्रणमामि देवीम् ॥२॥ इति
ध्यात्वा ॥ हृदये अष्टदलकमलं विचिंत्य ॥ तेषु दलेषु पू
र्वदेशादारभ्य आसनेन म ॥ कर्णिकामध्ये हस्तं निधा
य ॥ एकादशेंद्रियसहितान् कोशत्रयसहितान् पंचप्राणा
न् प्रतिष्ठाप्य ॥ देवानां भद्रा सुमतिर्ऋजूयतां देवानां राति
रभिनो निवर्त्तताम् ॥ देवानां सख्यमुपसेदिमा वयं देवा न

विष्णु॰
॥१५७॥

आयुः प्रतिरं तु जीवसे॥ इमं मंत्रमुच्चार्य॥ ॐ आं ह्रीं श्रीं क्रौं
क्लीं ॐ यं रं लं वं शं षं सं हं हंसः सोहं मम प्राण इह प्राणाः॥
ॐ आं ह्रीं श्रीं क्रौं क्लीं ॐ यं रं लं वं शं षं सं हं हंसः सोहं मम
जीव इह स्थितः॥ ॐ आं ह्रीं श्रीं क्रौं क्लीं ॐ यं रं लं वं शं षं सं
हं हंसः सोहं मम सर्वेंद्रियाणि मनो बुद्धि अहंकार चित्ता प
थिव्यप्तेजोवाय्वाकाशाश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्
पाणिपादपायूपस्थ शब्दस्पर्शरूपरसगंधा इहागत्य तु
सुखं चिरं तिष्ठंतु स्वाहा॥ एवं त्रिः॥ प्रतिष्ठाप्य प्रतिष्ठाव
त इति मंत्रं पठेत्॥ हं सं षं शं वं लं रं यं क्रौं क्लीं श्रीं ह्रीं आं

प्रतिष्ठा॰
॥१५४॥

ओं हृदि प्राणस्तिष्ठतु॥ गुदे अपानस्तिष्ठतु॥ नाभौ समानस्ति
ष्ठतु॥ कंठे उदानस्तिष्ठतु॥ व्यानः सर्वशरीरे तिष्ठतु॥ एक
मस्ति शरीरं सर्वै स्वतं सच्चिदानंद द्वयं ब्रह्म सगासमस्मि
न् मुक्तोहमस्मिन्मुक्त इति दक्षिण हस्तेन देवं स्पृशेत्॥
एवं प्राणप्रतिष्ठा मूलमंत्रेण स्वागतं नखकेशांतानि
देवगात्रेषु स्थापयामि स्वाहा॥ आ केशादि नखाग्रांतं सां
गं स्पृष्ट्वा देवस्य केशादि नखाग्रांतानि स्पृशेत्॥ मुक्तोह
मस्मि इति ब्रूयात्॥ ततो मूलमंत्रेण नीराजनं दत्वा भो
स्वामिन् विष्णु नारायण जगत् भगवन् अस्यां प्रतिमायां

विष्णु॰ ॥१५॥

सन्निधोभव॥सन्निरुद्धोभव॥सुप्रसन्नोभव॥अभिमुखोभव॥वरदोभव॥स्थिरोभव॥इतःपरं पूजांस्वीकुरु॥सान्निध्यंकुरुमेदेव सर्वसंपत्करो मम॥लक्ष्म्या सहजगद्धात्र्याधरण्याचसमद्वये॥१॥सान्निध्यंकुरुदेवेश सर्वदा सर्वकामद॥द्रव्यमंत्रक्रियाभक्तिश्रद्धाहीनंसहस्व मे प्रभो॥२॥एवं देवपादौकराभ्यां धृत्वा॥संप्रार्थ्य॥देवस्य दक्षिणवामपार्श्वयोः श्रीदेव्योर्भूदेव्योश्चावाह्य॥मूलमंत्रेण सर्वेषां प्रतिष्ठादिकंपूर्ववत्कृत्वा॥देवीगायत्रींश्रीश्चतेलक्ष्मीश्चेति॥लक्ष्मीसूक्तंभूसूक्तानिपठेत्॥अथ सप्तदशकलशानावाह्य॥तत्संनिधिभागे कुंभंनिधाय॥कुंकुमानि

प्रतिष्ठा॰ ॥१५॥

निक्षिप्य॥शुद्धजलेनपूरयित्वा॥पुष्पाण्यश्वत्थपल्लवान्निक्षिप्य॥प्रथमकलशमारभ्य सप्तदश कलशपर्यंतंकलशेद्रव्याणिनिक्षिपेत्॥प्रथमे पंचरत्नानि॥द्वितीयकलशे दूर्वाविष्णुक्रांताश्यामाकापमार्गपत्राणि२ तृतीये एलालवंगतक्कोलकर्पूरमिश्रतुलसीदलानि३ चतुर्थे पंचगव्यकुशाग्राणि अक्षतान्यवतंडुलान्श्वेतसर्षपान्बिल्वदलानि दूर्वांकुरान्४ पंचमे केवलघृतं५ षष्ठे दधि६ सप्तमे क्षीरं७ अष्टमे माक्षिकं८ नवमे कषायांबु९ दशमे उष्णोदकं१० एकादशे फलान्युदकानि११ द्वादशे शुद्धजलं१२

त्रयोदश्यो अस्तान् ॥ चतुर्दशी रत्नांभः १४ ॥ पंचदश्यो लोह
तोयं ॥ षोडश्यो गंधोदकं ॥ सप्तदश्यो शुद्धधान्य हरिद्राचू
र्ण सुवर्ण तुलसी मंजरी प्रक्षिप्य ॥ पुरुषसूक्तप्रथमऋचा
देवतामावाह्य ॥ प्रथमकलशोदकेनाभिषेचनं ॥ विष्णोरर
टमसीति पुरुषसूक्तद्वितीयऋचा पीठं दत्वा द्वितीयकलशे
नाभिषिंच्य ॥ प्रणवेन कूर्चं दत्वा ॥ आपो हि ष्ठेति तिसृभिः पु
रुषसूक्ततृतीयऋचा अर्घ्यं दत्वा तृतीयकलशेनाभिषिंच्य
तु ॥ आपः पाद्यावनेजने इति पुरुषसूक्तचतुर्थऋचा पाद्यं
दत्वा चतुर्थकलशेनाभिषेचनं ॥ शन्नो देवीरिति पुरुषसू
क्तपंचमऋचा आचमनं दत्वा पंचमकलशोदकेनाभिषिंचे

त् ॥ इमा आपः शिवतमाः पूताः पूततमाः मेध्या मेध्यतमा
अमृता अमृतरसाः ॥ पाद्याचमनीयार्घ्यं स्वाजुषं तां प्रति
गृह्णातु महाविष्णुर्विष्णवे नम इति प्रत्येकं यथालिंगं पाद्या
चमनीयार्घ्यानि पुनर्दद्यात् ॥ षष्ठमकलशमारभ्य समुद्र
शाकलशपर्यंतं पुरुषसूक्तषष्ठऋचामारभ्य सर्वाभिः ऋ
ग्भिः सर्वकलशेनानुक्रमेण देवमूर्ध्नि अभिषिंचेत् ॥ सू
त्रवेष्टित पश्चिमभागस्थ पूर्णकुंभं शंन्न इति पावमानेन न
चाभिमंत्र्य द्विजैः सूर्यघोषयुक्तं मूलमंत्रेण विष्णुसूक्ते
नाभिषिंच्य मूलमंत्रेण पुरुषसूक्तऋग्भिः सर्वोपचारान्

विष्णु० ॥१७॥

समर्पयेत्॥ इदं विष्णुर्विचक्रम इति गंधान्॥ इमे पुष्पाः शुभा प्रतिष्ठा०
दिव्यं सर्वं पुष्पैरलंकृतं॥ पूता ब्रह्मपवित्रेण पूताः सूर्यस्य
रश्मिभिः॥ प्रतिगृह्णाण भगवन् महाविष्णु विष्णवे नम इति
पुष्पाणि अष्टोत्तरशतनामभिश्च चतुर्थ्यंतैः सहस्रनाम
भिश्च यथाशक्ति संपूज्य। केशवादिनामभिः पुष्पपूजां कु
र्यात्॥ वनस्पतिरसैर्दिव्यैर्गंधाढ्यैः॥ महाविष्णुविष्णवे नमः
इति धूपं॥ साज्यं त्रिवर्त्ति॰ दीपं दत्वा॥ ततः केशवादिनाम
भिः शुद्धजलेन तर्पणं कृत्वा॥ घृतसर पायसं गुडोदनं चित्रौ
दनं नानाविधपक्वान्नानि शुभ्रशाल्योदनं भक्ष्याणि षड्रसो
पेतं भोजनद्रव्यं दद्यात्॥ सर्वफलानि दद्यात्॥ दध्योदनं च ॥१७॥

सर्वपरिकरमिश्रं निवेद्य॥ पवित्रं ते विततमिति मंत्रेण के
वलपरमान्नं शर्करायुतं घृतयुतं सुवर्णपात्रे निवेद्य॥ नानावि
धकर्पूरतांबूलानि समर्प्य॥ पुष्पांजलिं समर्प्य॥ अनेकप्र
दक्षिणानमस्कारान् कृत्वा॥ पुनर्नत्वा॥ स्तुत्वा च क्षमापने॥
मंत्रद्वयं अष्टोत्तरशतं जपित्वा॥ मूलमंत्रेण देवं वेद्यांशाय
नेशाययेत्॥ धातुस्थावरमूर्त्तिश्चेत् साक्षात्कारेण शा
ययेत्॥ स्थावरमूर्त्तिश्चेत् तदा ध्यायेदिति तात्पर्यं॥ अं
गभंगादि वैकल्यश्चेत् तच्छांत्यर्थं अष्टोत्तरशताज्याहु
तीर्हुत्वा॥ पुनर्देवमुत्थाप्य॥ पायसं निवेद्य॥ धातुमूर्त्तिश्चे
त् धान्यराश्युपरि निवेद्य॥ मूलमंत्रेण घृतसरमाज्यं च जु

हुयात्॥वासुदेवायस्वाहा॥संकर्षणाय॰प्रद्युम्नाय॰शार्ङ्गिणे॰
अनिरुद्धाय॰श्रियेस्वा॰सरस्वत्यै॰महाविष्णवे॰विष्णोर्नुकं॰
तदस्यप्रियं॰प्रतद्विष्णुः॰पुरोमात्रया॰विचक्रमेत्रिर्देवइति॥
द्वादशनामभिः अमुष्मैस्वाहा॥मुष्मैस्वाहा॥इतिहुत्वा॥दे
व्यामूलमंत्रेणवागायत्र्याहुत्वा॥गरुडविष्वक्सेनशाषेभ्यः
आदित्यादिनवग्रहदेवेभ्यः इंद्रादिलोकपालेभ्यः दुर्गागण
पतिक्षेत्रपालेभ्यः कर्मांगदेवताभ्यः परिवारदेवताभ्यः
पूर्ववद्रव्यैः तत्प्राशकमूलमंत्रेहुत्वा॥समित्संनहनहो
मंहुत्वा॥बर्हिः समंजनपूर्वकंप्रायश्चित्ताहुतीहुत्वा॥मु
हानैवेद्यंदत्वा॥पूर्णाहुतिंदत्वा॥ततोदिग्पुदीपदानपूर्वकं

बलिपूजांदत्वा॥प्रदक्षिणानमस्कारान्।प्रणितामार्जनं
ब्रह्मोद्वासनंचकुर्यात्॥आचार्यब्रह्मऋत्विग्भ्यःश्रेयोगृ
हीत्वा॥गोभूतिलहिरण्यवस्त्रसुवर्णपुष्पाद्यैस्तान्परि
तोष्य॥अग्निप्रार्थनंकुर्यात्॥त्वय्यकमाद्यंपुरुषपुरात
नंनारायणंविश्वसृजंयजामहे॥त्वमेवयज्ञोविहितोवि
धेयस्त्वमात्मनात्मन्प्रतिगृण्हहव्यमिति॥१॥अग्निंयज्ञ
मितिसंप्रार्थ्य॥अश्वत्थपर्णाग्रेणहुतशेषंनिदधाति॥
भूर्भुवः स्वरोमितित्रिः प्रदक्षिणंचतुर्वाप्रदक्षिणंस्वा
हाग्निंकरोति॥अथविश्वभुजेनमः॥आसनेनं॰सर्वभु

विष्णु॰ ॥११४॥

जेऽपरमात्मने॰ इत्यग्निं पुनर्नत्वा॥ ततो देवं ध्यात्वा स्तुत्वा॥ प्रतिष्ठा॰
ब्राह्मणान्सह स्वेच्छातो वा भोजयित्वा॥ आशिषो वाचयित्वा॥ ते
भ्यो दक्षिणा तांबूल परिमल द्रव्याणि दत्वा तान्नमस्कुर्यात्॥
पंगुदीनांधकृपणान्तोषयित्वा॥ आशिषो वाचयित्वा॥ याव
जीवं प्रत्यहं देवं पूजयेत्॥ एवं विष्णुमूर्त्तिप्रतिष्ठायः करो
ति तस्य ऐहिकामुष्मिकफलानि देवदेवो ददातु॥ ॥इत्या
गमोक्तप्रकारेण विष्णुमूर्त्तीनां प्रतिष्ठा समाप्ता॥ श्रील
क्ष्मीकांतार्पणमस्तु॥ शुभं भवतु॥ ॥द्वादशाक्षर मंत्रः॥
ॐ नमो भगवते वासुदेवाय॥ अष्टाक्षर मंत्रः॥ ॐ नमो ना ॥१५॥

रायणाय॥ ॥शाके १७४८ वर्षे व्ययनाम्नि उदगयने शैशिर
ऋतौ माघशुक्ल १० भौमवासरे रोहिणीनक्षत्रे अंदनकारोप
नामक बंगाभट्टस्य सुतेन सखारामेणेदं विष्णुपकृतिप्रति
ष्ठापुस्तकं स्वार्थं परोपकारार्थं च लिखितं॥ लेखकपाठक
योःशुभमस्तु॥
अथातो वापीकूपतडागारामदेवतायतनानां प्रतिष्ठापनवि
धिं व्याख्यास्यामः॥ तत्रोदगयन आपूर्यमाणपक्षे पुण्याहे
तिथिवारकरणनक्षत्रे च गुणान्विते वारुणं यवमयं चरु
॥११८॥ णं श्रपयित्वा ग्रहदिग्देवताः स्नापयित्वा॥ ज्यभागाविष्ट्वाज्या
१९ हुतीर्जुहोति त्वन्नो अग्ने स त्वन्नो अग्ने इमं मे वरुण तत्वा

यामियेतेशतमयाश्चाग्नउदुत्तममुमुग्ध्यं हिवरुणस्योत्तम
नमग्नेरनीकमितिद्वराचींध्रं हुत्वास्वोलीपाकेस्यजुहोत्यग्न
येस्वाहासोमायस्वाहावरुणायस्वाहायुत्रायस्वाहोग्रायस्वा
हाभीमायस्वाहाशतक्रतवेस्वाहाव्युष्टयेस्वाहास्वर्गायस्वा
हेतियथोक्तंस्विष्टकृदादिग्रासांतेजलचरान्सिसालंकृत्स
गामर्चयित्वाचार्यायवरंदत्वाकर्णवेष्टकौयुवद्वासोयुग्मध
वंदक्षिणांचततोब्राह्मणभोजनं॥१॥६॥